| अथोपपातकानि । | प्रायश्चित्तानि । | तदशक्तौ धेनुदानम् । | तदशक्तौ चूर्णोदानम् । | दक्षिणा । |
|---|---|---|---|---|
| परिहितनीलवस्त्रस्य भोजनम् । | अज्ञानतस्त्रिरात्रोपवासः । | ० | १॥० कार्षापणः । | यथाशक्ति । |
| | ज्ञानात् द्विगुणम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| स्वकीयोच्छिष्टभोजनम् । | कृच्छ्रपादः । एतत् सकृदज्ञानतः । | ० | ॥० पणाः । | यथाशक्ति । |
| | अभ्यासे द्विगुणादिकम् । त्यक्तभाजने भोजनेऽप्येवम् । | | | |
| ब्राह्मणकर्त्तृकब्राह्मणोच्छिष्टभोजनम् । | महाव्याहृतिभिरामन्त्र्य जलं पीत्वा उपवसेत् । | ० | ॥० पणाः । | यथाशक्ति । |
| | एतत् सकृदज्ञानतः । | | | |
| | ज्ञानात् द्विगुणम् । | ० | १ कार्षापणः । | यथाशक्ति । |
| ब्राह्मणकर्त्तृकक्षत्रियोच्छिष्टभोजनम् । | सकृदज्ञाने त्र्यहं ब्राह्मीरसविपक्वक्षीरपानमात्रम् । | ० | १॥०कार्षापणः । | यथाशक्ति । |
| | ज्ञाने द्विगुणम । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| ब्राह्मणकर्त्तृकवैश्योच्छिष्टभोजनम् । | सकृदज्ञाने त्र्यहोपवासः ब्रह्मसुवर्चलापानञ्च । | ० | १॥०कार्षापणः । | यथाशक्ति । |
| | ज्ञानात् द्विगुणम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| ब्राह्मणकर्त्तृकशूद्रोच्छिष्टभक्षणम् । | सकृदज्ञाने षड़रात्रोपवासः । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| | ज्ञानात् द्विगुणम् । | | | |
| | ज्ञानाभ्यासे चान्द्रायणम् । | ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| | क्षत्रियादीनां पादपादहानिः । | | | |
| | एतन्मातृपितृज्येष्ठभ्रातॄणामुच्छिष्टव्यतिरिक्तविषयं तेषामुच्छिष्टस्य भोज्यत्वात् | | | |
| विड़ालकाकमूषिकनकुलश्वगवां उच्छिष्टभोजनम् । | त्र्यहोपवासः । | ० | १॥० कार्षापणः । | यथाशक्ति । |
| | एतत् सकृज्ज्ञानतः । | | | |
| | अज्ञाने ब्रह्मसुवर्चलां पीत्वोपवासः । | ० | ॥० पणाः । | यथाशक्ति । |
| | ब्रह्मसुवर्चला तु पीतकुसुमसूर्य्यावर्त्तः । | | | |
| | अत्यन्ताभ्यासे अतिकृच्छ्रम् । | ३ धेनवः । | ८ कार्षापणाः । | यथाशक्ति । |
| ब्राह्मणस्य कुत्सितपङ्क्तौ भोजनम् । पङ्क्तेः कुत्सितत्वन्तु निन्दितब्राह्मणाद्युपवेशनेन जलादिना पङ्क्तिभेदमन्तरेण च भवति । | अहोरात्रोपवासः स्नानं पञ्चगव्यपानञ्च । | ० | ॥० पणाः । | यथाशक्ति । |
| | एतत् ज्ञानतः । | | | |
| | क्षत्रियपङ्क्तौ भोजने नक्तव्रतम् । | ० | ।० पणाः । | यथाशक्ति । |
| | वैश्यपङ्क्तौ एकरात्रोपवासः । | ० | ॥० पणाः । | यथाशक्ति । |
| | शूद्रपङ्क्तौ त्रिरात्रोपवासः । | ० | १॥०कार्षापणः । | यथाशक्ति । |
| पङ्क्तिषु एकस्योत्थाने भोजनम् । | द्व्यहसाध्यसान्तपनम् । | ० | १ कार्षापणः । | यथाशक्ति । |
| | एतद्ब्राह्मणस्य । | | | |
| | क्षत्रियादीनां पादपादहानिः । | | | |
| | एतज्ज्ञानतः सकृत् । अज्ञानतोऽर्द्धम् । | | | |
| सुराभाजनस्थजलपानम् । | पञ्चं यावकपानम् । एतज्ज्ञानतः । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| | अज्ञानतोऽर्द्धम् । | | | |
| मद्यभाण्डस्थजलपानम् । | सप्तरात्रं यावकपानम् । एतज्ज्ञानतः । | ० | १॥०कार्षापणः । | यथाशक्ति । |
| | अज्ञानतोऽर्द्धम् । | | | |
| | सुरासंसृष्टरेतोमूत्रादिदूषितजलादिपाने तु चतुरहसाध्यं तप्तकृच्छ्रम् । | सपादधेन्वसम्भवात् २ धेनू । | ३॥० कार्षापणाः । | यथाशक्ति । |
| | एतदपि स्यादनुपलब्धावभ्यासे । | | | |
| चण्डालकूपभाण्डोदकपानम् । | ब्राह्मणस्य सान्तपनम् । | २ धेनू । | ६ कार्षापणाः । | यथाशक्ति । |
| | क्षत्रियस्य प्राजापत्यम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| | वैश्यस्य प्राजापत्यार्द्धम् । | ० | १॥० कार्षापणः । | यथाशक्ति । |
| | शूद्रस्य प्राजापत्यपादः । | ० | ॥० पणाः । | यथाशक्ति । |
| | एतत् सर्व्वं ज्ञानतः । | | | |
| | अज्ञानादेतस्यार्द्धम् । | | | |
| | आपत्कालेतु पूर्व्वेद्युरुपोष्य पञ्चगव्यपानम् | ० | ॥० पणाः । | यथाशक्ति । |